॥ॐ॥

अ॒ग्निमी॑ळे पु॒रोहि॑तय्ँय॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् ।
होता॑रं रत्न॒धात॑मम् ॥१॥

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भिर् ईडियो॒ नूत॑नैरुत ।
स दे॒वाँ एह व॑क्षति ॥२॥

अ॒ग्निना॑ र॒यिम॑श्नव॒त् पोष॑मे॒व दि॒वेदि॑वे ।
य॒शसं॑ वी॒रव॑त्तमम् ॥३॥

अग्ने॒ यय्ँय॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑ ।
स इद् दे॒वेषु॑ गच्छति ॥४॥

अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः ।
दे॒वो दे॒वेभि॒राग॑मत् ॥५॥

यद॒ङ्ग दा॒शु॒षे॒ तु॒वम् अग्ने॑ भ॒द्रं क॑रि॒ष्यसि॑ ।
तवेत् तत्सत्यम॑ङ्गिरः ॥६॥

उप॑ त्वाग्ने दि॒वेदि॑वे दोषा॑वस्तर्धि॒या व॒यम् ।
नमो॒ भर॑न्त॒ एम॑सि ॥७॥

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम् ।
वर्ध॑मानं॒ सुवे दमे॑ ॥८॥

स नः॑ पि॒तेव॑ सू॒नवे अग्ने॑ सूपाय॒नो भ॑व ।
सच॑स्वा नः स्व॒स्तये॑ ॥९॥